**International Journal of Academic Research and Development**
**ISSN: 2455-4197**
**www.newresearchjournal.com/academic**
**Volume 1; Issue 3; March 2016; Page No. 55-56**

# कौमुदीविलासे प्रातिपादिकसंज्ञाविचार

**बृजभूषण शर्मा**

शोधच्छात्रः, (S.R.F.), राजस्थान विश्वविद्यालयः, जयपुरम्, राजस्थानम्

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्। प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।इति स्मृत्या 'प्रधानं च षट्स्वङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवति इति महाभाष्योक्त्या च सर्वविद्यासु व्याकरणस्य महत्त्वं स्पष्टम्। तच्च युक्तम्। यतस्तज्ज्ञानं विना अनिर्वचनीयसंसारदुःखोपशामकस्य वेदनिहितस्य धार्माधर्मज्ञानस्य प्रयत्नशतेनापि प्राप्तुमशक्यत्वात्। तत्र च वेदस्य शब्दरूपत्वात्, शब्दार्थज्ञानं विना वेदार्थज्ञानं न भवतीति तदर्थं शब्दार्थज्ञानं, तदर्थं च व्याकरणशास्त्रज्ञानमावश्यकम्। अनेनवास्य सर्वशास्त्रोपकारकत्वमपि सिद्धम्। तदुक्तमभियुक्तैः–

**सर्ववेदपारिषदं हीदं शास्त्रं, काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इति।**

एतादृशेऽस्मिन् व्याकरणशास्त्रे सत्स्वपि नैकव्याकरणेषु पाणिनीयकात्यायन– पतञ्जलिरूपत्रिमुनिप्रणीतं व्याकरणं सर्वज्ञसकलशास्त्रयथार्थमर्मज्ञमहर्षिप्रकाशितं वेदार्थपरिज्ञानप्रयोजनमज्ञानकर्दमकलुषितजनवाणीपरिशोधने कतकबीजायते। एतादृशेऽस्मिन् व्याकरणोदधाववलोक्यते द्वैविध्यं ग्रन्थानाम्–

1) प्रक्रियाग्रन्थाः
2) आर्थिकग्रन्थाश्च

प्रकृतिप्रत्ययार्थनिष्कर्षपूर्वकं तदन्वंयबोधप्रदर्शनपराः ग्रन्थाः आर्थिकाः इति। प्रकृतिप्रत्ययविभागेन सुबन्ततिङन्तपदनिष्पादनौपायिकप्रक्रियाप्रधानग्रन्थाः प्रक्रियाग्रन्थाः इति। प्रक्रियाग्रन्थत्वेन वामनजयादित्यकृतकाशिका, भट्टोजिदीक्षितकृता सिद्धान्तकौमुदी चात्र प्रसिद्धे।

एवञ्च जटिलानि बालस्य शीघ्रावबोधे च बाधकानि कतिपयशतसंख्याकानि सूत्राणि सिद्धान्तकौमुदीतः न्यूनीकृत्य लघुसिद्धान्तकौमुदीतः सम्बद्र्ध्य च मध्यसिद्धान्तकौमुदी विरचिता वरदराजाचार्येण। अस्यां प्रक्रियाग्रन्थपरम्परायां श्रीमन्मौनिकुलतिलकायमान– श्रीमद्गोवर्द्धनभट्टांगजरघुनाथभट्टसूनुजयकृष्णभ– ट्टकृतमध्यसिद्धान्तकौमुदीविलासेऽजंतपुल्लिंगप्रकरणे प्रातिपदिकसंज्ञाविचारःइत्थं कृतः वर्तते।

अथ स्वादिप्रक्रिया निरूप्यते.। तत्र तावदजंतपुल्लिंगादकारादिक्रमेण व्युत्पादयितुकामः स्वादीनवतारयन् तत्प्रकृतिभूतां प्रातिपदिकसंज्ञां लक्षयति अर्थवत्। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1/2/45) अर्थवद्, अधातुः, अप्रत्यय, प्रातिपदिकम् इति पदविभागः। चतुष्पदात्मकं प्रातिपदिकसंज्ञाविधायकसूत्रमिदम्। सूत्रार्थस्तु एवं फलति–धातुं प्रत्ययं प्रत्यान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। अर्थवदिति नपुंसकनिर्देशः शब्दस्वरूपापेक्षया। अधातुरप्रत्यय इति पुल्लिंगनिर्देशस्तु परवल्लिंगं द्वंद्वतत्पुरूषयोरित्युत्तरपदलिंगत्वाद्बोध्य इत्याहुः प्रत्ययं प्रत्ययांतं चेति। सूत्रे तन्त्रादि[1]नोभयं[2] विवक्षितमितिभावः। न वा संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नेति ज्ञापितत्वात्प्रत्ययांतं वर्जियित्वेत्येदयुक्तमिति वाच्यं प्रसज्यप्रतिषेधे हि नायं संज्ञाविधिः किंतु निषेधविधिः पर्युदासेपि यत्र प्रत्ययस्वरूपं संज्ञिरूपेनुप्रविशति तत्रायं निषेधः। इह तु तद्व्यतिरिक्तः संज्ञीत्यदोषः। अर्थवदिति किं धनं वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत तस्यां च सत्यां स्वादयः स्युः। ननु कर्मादेरभावान्न भविष्यतीति चेन्न। 'एकवचनमुत्सर्गतः करिष्यत इति सिद्धांता[3]त्सोवरित्वात्। यद्यप्यधातुरिति पर्युदासेनार्थवत्त्वं[4] लभ्यते। तथाप्युत्तरार्थमर्थवद्ग्रहणं स्पष्टप्रतिपत्तये च इहैव कृतं। अधातुः किं? अहन् हंतेर्लङि शपो लुकि हल्ङ्यादिलोपेऽटि च रूपम्। धातोः प्रातिपदकसंज्ञायां सत्यां तिङां स्वाद्यपवादत्वादहन्नित्यत्रहंतेस्तिपिसिपि वा कृते इतश्चेतीकारलोपे हलङ्यादिलोपे च प्राक्कृताप्रातिपादिकसंज्ञा नापगतेति नलोपः प्रातिपदिकांतस्येति न लोपः स्यात्तन्माभूत्। न च कार्यकालपक्षे प्रत्ययलक्षणेन प्रत्ययांतत्वात् प्रातिपदिकत्वाभावेन न लोपो न भवेदिति वाच्यम् प्रातिपदिकसंज्ञायां प्रत्ययलक्षणेना–प्रत्ययांत इति पर्युदासो न प्रवर्त्तते। न ङिसंबुद्ध्योरिति निषेधेन ज्ञापितत्वात्। अहन्निति रूत्वं रोसुपीति रत्वं चेह नाशंक्यं लाक्षणिकत्वात्। न च सुपोधात्विति सूत्रे प्रातिपदिकात्पृथक्धातुग्रहणात् धातोर्नेयं संज्ञेति वाच्यं। पुत्रीय– तीत्यादौ प्रत्ययांते धातुग्रहणस्य चरितार्थत्वात्। अप्रत्ययः किं हरिषु करोषि सुप्– सिपोर्माभूत। अप्रत्ययांत किं। तत्रैव विभक्तिविशिष्टियोर्माभूत्[5]। न चांतवद्भावेन कांडे इत्यादौ प्रातिपदिकत्वं स्यात्। तथा च ह्रस्वोनपुंसक इति ह्रस्वः सोरूत्पतिश्च स्यादिति वाच्यम्। सप्तम्यधिकरणे चेत्यादि निर्देशेन विभक्त्येकादेशस्यां–तवदभावनभ्युपगमादिति दिक्। ननु पर्युदासो न कर्तव्यः। प्रत्ययांतपर्युदासेनैव गतार्थत्वात्। व्यपदेशवद्भावेन तस्यापि प्रत्ययांतत्वादिति चेत् मैवं प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदंतस्यग्रहणात् केवलस्यचाऽतथात्वात् अन्यथा सुप्तिङोरपि तदंतत्वात्पदत्वं स्यात्। तथा च हरिषु करोषीत्यादौ षत्वं न स्यात् सात्पदाद्योरिति निषेधात्। न च षत्वविधेर्निरवकाशता सर्पिष एष इत्यादौ चरितार्थत्वात्। अधातु प्रत्ययाविति सिद्धे नञ्द्वयोपादानमप्रत्यय इत्यस्यावृत्तिसौकर्यार्थम्। महासंज्ञाकरणं श्रुत्यनुरोधात् तथा चाथर्वणे पठ्यते को धातुः किं प्रातिपदिकं कः

---

[1] (सकृदुच्चरितः शब्दोऽनेकार्थपरो यत्र तत्र तन्त्रेति व्यवहारः)

[2] उभये = प्रत्ययपदं प्रत्ययपरं प्रत्ययान्तपरम्।

[3] वस्तुतस्तु तदुत्पत्तिः सत्येव गमके यथाऽव्ययेभ्यः उत्पतौ 'अव्ययादाप्सुप' इति गमकम्, नान्यत्र। प्रकृते तु न तथा गमकम्। अत एव भाष्ये – अर्थवत्पदस्य दशदाडिमानीत्यादिपदसमुदायो निरर्थको व्यावर्त्त्यत्वेन प्रदर्शितः।

[4] नञ् निपोतेन इव निपातेन च युक्तः शब्दो भवति, तस्य तद्भिन्नः तत्सदृशश्च अर्थो भवति, तथैवानुभावत्। प्रकृते च व्याख्यानात् अर्थवत्त्वेनैव सादृश्यं ग्रह्यत इति भावः।

[5] उत्तरसूत्रे तद्धितग्रहणस्य नियमार्थत्वात् "तार्द्धतान्तानामेव न त्वन्यप्रत्ययन्तानामिति" न प्रत्ययान्तेष्वनिव्याप्तिः।

प्रत्यय इति डित्थादीन्यव्युत्पन्नानीहोदाहरणं– "कृत्तद्धितसमासाश्च"[6](1/2/46) कृत्तद्धितसमासाः, च पदविभागः। द्विपदात्मकं सूत्रमिदम्। कृच्च तद्धितश्च समासश्चेति विग्रहः=कृत्तद्धितसमासाः। सूत्रार्थस्तु एवं फलति–कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः। कृदन्ते यथा–कर्त्ता, तद्धिते यथा–औपगवः, समासे यथा–राजपुरुषः इत्यादि। कृत्तद्धित अर्थवदित्यनुवर्त्तते तत्सामर्थ्यात्तदंतविधिः ननु यद्यर्थवत्ता पारमार्थिकी विवक्ष्यते सापदस्य वाक्यस्य वा अस्ति न तु कृत्तद्धितांतस्य यदि तु प्रक्रियादशायां या विकल्पना सा विवक्षते तर्हि कृत्तद्धितयोरपि सा अस्तीति कथमर्थवद्ग्रहणानुवृत्त्या तदंतग्रहणमिति चेत् अत्राहुः अत एवार्थवद्ग्रहणसामर्थ्यमुक्तं प्रत्ययांत नह्येकार्थीभूतेन प्रतीयमानोऽर्थ इह गृह्यते तस्य लौकिकार्थं प्रतिप्रत्यासन्नतरत्वात् प्रशंसायां विहितस्य मतुपः प्राशस्त्यपरतया तस्यैवार्थस्य ग्रहणात्। अत एवार्थवद्ग्रहणं सार्थकं पूर्वसूत्रे अधातुरितिपर्युदासबलेनापि तल्लाभसंभवात्। तदेतत्सकलमभिप्रेत्याह कृत्तद्धितांताविति लिट् धुक् इत्यादावधातुरिति कर्त्ता औपगव इत्यादौ अप्रत्ययांतमिति पर्युदासे प्राप्ते कृत्तद्धितेत्यारंभः प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदंतस्यग्रहणात् वाक्यस्याप्रत्ययांतत्वेन समासस्य पूर्व– सूत्रेणैव प्रातिपदिकसंज्ञायां सिद्धायां समासग्रहणं नियमार्थं। यत्र संघाते पूर्वोभागः पदं उत्तरस्तु प्रत्ययो न चेद्भवति तर्हि समासस्यैव तेन गामभ्याजशुक्लामिति वाक्यस्य न भवति सत्यां हि संज्ञायां सुब्लुक् स्यात्। पूर्वोभागः पदमिति किं बहुपटव इत्यत्र बहुज्विशिष्टस्य[7] प्रातिपदिकसंज्ञा यथा स्यात् तेन बहुपटव इत्यत्रोपोत्तमोदात्तत्वं सिध्यति प्रथमजसोलुकि चितः स प्रकृतेर्बह्वकजर्थमिति चित्स्वरे कृते[8] पुनर्जस उत्पत्तेः प्रातिपदिकसंज्ञायामसत्यां तु जसेवोदात्तः स्यात् उत्तरस्तु प्रत्ययो नेति किं। जन्मवानित्यत्र संज्ञा यथा स्यात् स्वादिष्वित्यनेन पूर्वभागस्य[9] पदत्वात्। न च तद्धितग्रहणसामर्थ्यात्तत्र स्यादेवेति वाच्यं तद्धितग्रहणस्य भानव इत्यादौ सावकाशत्वात् तत्रहि पूर्वभागस्य पचिभमिति भत्वं न तु पदत्वं न चैवमयमियानित्यादि समुदायस्य प्रातिपदिकत्वं स्यादेव पूर्वभागस्यपदत्वेप्युत्तरस्य प्रत्ययत्वादनेननियमेन वारयितुमशक्यत्वात् इति वाच्यम्। उत्तरस्तु प्रत्ययो नेत्यत्र तद्विहितप्रत्ययो नेति व्याख्यानात्। चकारोनुक्त समुच्चयार्थः। तेन निपातस्यानर्थकस्य प्रातिपादिकसंज्ञावक्तव्येति वार्तिकं गतार्थम्।

उपर्युल्लिखित–विषयाध्यनेन एवं वक्तुं शक्यते यत् श्रीमन्मौनिकुलतिलकायमानश्रीमद्गोवर्द्धनभट्टांगजरघुनाथसूनुजयकृष्णभट्टकृतमध्यसिद्धानकौमुदीविलासोपरि श्रीज्ञानेन्द्रसरस्वती कृता तत्त्वबोधिन्या एवञ्च मनोरमाशब्दरत्नयोः प्रभावः सुस्पष्टतया परिलक्ष्यते। इति शम्।

**सहायकग्रन्थसूची**


1. अष्टाध्यायीकाशिकावृत्तिः, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली।
2. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्, डॉ. मोहनदत्त शर्मा, पूना, 1974।
4. प्रक्रियाकौमुदी (प्र.कौ.), के.पि. त्रिवेदिना सम्पादिका, मुम्बई, 1925।
5. प्रौढमनोरमा, श्रीभट्टोजिदीक्षितः, चौखम्भा कृष्णदास अकादमी, वाराणसी, संस्करणः पुनर्मुद्रित, वि.सं0 2064ः
6. प्रौढमनोरमा शब्दरत्न–भैरवी–भावप्रकाशसरलोपेता, चौखम्भा, वाराणसी।
7. मध्यद्धिान्तकौमुदी 'लक्ष्मी' – मुद्रिका संस्कृत–हिन्दी व्याख्योपेता सरल– सुबोधपरिशिष्टादिसहिताच, चौखंभाओरियन्टालिया, दिल्ली, 110007 (भारत)
8. महाभाष्यम् (म.भा.) भारतीयाद्यिशासनसंरक्षकतायां प्रकाशितम् भागत्रयात्मकम्, मोतीलाल बनारसीदास, 1967।
9. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्भा पब्लिशर्स, वाराणसी, संस्करण 2004
10. शब्दकौस्तुभः प्रथमभागः, चौखम्भा, 1929।
11. शब्दकौस्तुभः, द्वितीयभागः, चौखम्भा, 1929।
12. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह. (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936।
13. सिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसीदास, देहली, 1964।
14. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, प्र.सं. 2007 (संवत)।
15. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, द्वि.सं. 2020 (संवत)।


---

[6] अष्टाध्यायी सूत्र सं. 1/2/46

[7] "विभाषा बहुच्पुरस्तात्तु" इति सूत्रेण 'बहुच्' प्रत्ययः "परश्च" इति बाधित्वा पूर्वभागे एव भवति।

[8] चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्तोदात्तो वाच्य इत्यर्थः।

[9] अत्र 'स्वादिष्वसर्वनामस्थाने' इति पूर्वभागस्य पदत्वम्।